त्रिकाण्डशेषभूरिप्रयोगौ च ॥ (आरट्टदेशोत्पन्ने, त्रि । यथा महाभारते,—

"सौधोः पानं गुरुतल्पावमर्द्दो
भ्रूणहत्या परवित्तापहारः ।
येषां धर्म्मस्तान् प्रति नास्त्यधर्म्म-
आरट्टजान् पञ्चनदान् धिगस्तु" ॥)

आरविः, पुं, ( आङ्+ऋ+अविच् । ) आवर्त्तः । तत्पर्य्यायः । कुलहृष्टकः २ । इति हारावली ॥ पाकमारा जल इत्यादि भाषा ॥

आरण्यपशुः, पुं, (अरण्ये भवः । अरण्य+ण्य+स चासौ पशुश्चेति कर्म्मधारयः ।) अरण्यजातपशुः । स च सप्तधा यथा । महिषः १ वानरः २ ऋष्यः ३ सरीसृपः ४ रुरुः ५ पृषतः ६ मृगः ७ । इति तिथ्यादितत्त्वे पैठीनसिः ॥

आरण्यमुद्गा, स्त्री,(अरण्यमुद्गस्येवाकारः पर्णे यस्याः । ततः स्वार्थे अण् । ) मुद्गपर्णी । मुगानी इति भाषा । इति राजनिर्घण्टः ॥

आरण्यराशिः, पुं, (अरण्ये भवः आरण्यः अत्र सिंह एव स एव राशिः ।) सिंहराशिः । मकरप्रथमार्द्धः । मीनमेषवृषराशयः । इति दीपिका ॥

आरतिः,स्त्री, (आङ्+रम्+क्तिन् ।) विरतिः । निवृत्तिः । इत्यमरः ॥ (उपरमः, नीराजनम् ।)

आरनालं, क्ली, (आर्च्छति आङ्+ऋ+अच् आरः । नल गन्धे ज्वलतीति णः नालः । आरः नालो गन्धो यस्य ।) काञ्जिकं । इति हेमचन्द्रः ॥

"आरनालन्तु गोधूमैरामैः स्यान्निस्तुषीकृतैः ।
पक्वैर्व्वा सन्धितैस्तत्तु सौवीरसदृशं गुणैः" ॥
इति राजनिर्घण्टः ॥

("लाक्षा हरिद्रा मञ्जिष्ठा कल्कैस्तैलं विपाचयेत् ।
षड्गुणेनारनालेन दाहशीतज्वरापहं" ॥ ० ॥
लाक्षादितैले ॥ * ॥ इति वैद्यकचक्रपाणिसंग्रहः ॥)

आरनालकं, क्ली, (आरनालम् एव स्वार्थे कः ।) काञ्जिकं । इत्यमरः ॥ कांजि इति भाषा ।

आरब्धं,त्रि, (आङ्+रभ्+क्तः ।) कृतारम्भं । आरम्भे क्ली । यथा,—

"आरब्धं मलमासात् प्राक् यत् कर्म्म न समापितं ।
आगते मलमासेऽपि तत् समाप्यं न संशयः" ॥
इति मलमासतत्त्वं ॥ * ॥ आरब्धकर्म्मण्यशौचाभावो यथा, —

"व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्च्चने जपे ।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकं" ॥
इति तिथ्यादितत्त्वं॥

आरम्भः, पुं, (आङ्+रभि+घञ् ।) प्रथमकृतिः । तत्पर्य्यायः । प्रक्रमः १ उपक्रमः २ अभ्यादानं ३ उद्घातः ४ आरम्भः ५ । इत्यमरः ॥ अभ्यादानादित्रयमारम्भमात्रे । प्रक्रमादिपञ्च आरम्भमात्रे इत्येके । केचित्तु प्रक्रमादिद्वयं प्रथमारम्भे ॥ अभ्यादानादित्रयं आरम्भमात्रे । इति वक्तमिरक्तमपि न साधु यतः प्रथमकृतिरेव आरम्भः तत्पूर्व्वद्वयं आरम्भे शेषत्रयं आरब्धे इत्याहुः । इति भरतः ॥ त्वरा । उद्यमः । वधः । दर्पः । इति मेदिनी ॥ प्रस्तावना । इति त्रिकाण्डशेषः ॥ आद्यकृतिः । यथा,—

"मीनादिस्थो रविर्येषामारम्भप्रथमक्षणे ।
भवेत्तेऽब्दे चान्द्रमासाश्चैत्राद्या द्वादश स्मृताः" ॥
आरम्भप्रथमक्षणे आद्यकृत्याद्यसमये । इति मलमासतत्त्वम् ॥ पारिभाषिकारम्भो यथा,—

"आरम्भो वरणं यज्ञे सङ्कल्पो व्रतजापयोः ।
नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिष्क्रिया" ॥
इति तिथ्यादितत्त्वम् ॥ (यथा मेघदूते । ३७ ।—
"नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छाम्" ।
साहित्यदर्पणे । प्रथमपरिच्छेदे ।
"ग्रन्थारम्भे निर्व्विघ्नेन प्रारिप्सितपरिसमाप्तिकामः" । रघुवंशे । १।१५ ।
"आगमैः सदृशारम्भ आरम्भसदृशोदयः" ।)

आरवः, पुं, ( आङ्+रु+अच् ।) शब्दः । इत्यमरः ॥ (यथा रामायणे । "वानराश्चक्रुरारवं" ।)

आरवी, स्त्री, आरवनामकम्लेच्छदेशीयभाषा । यथा,
"ज्येष्ठाश्लेषा मघा पूर्व्वा रेवती भरणीहये" ।
विशाखार्द्रोत्तराषाढ़शतभे पापवासरे ॥
लग्ने स्थिरे सचन्द्रे च पारसीमारवीं पठेत्" ;
इति गणपतिमुहूर्त्तः ॥

आरा, स्त्री, ( आङ्+ऋ+अच्+टाप् । ) चर्म्मभेदकास्त्रं । तत्पर्य्यायः । चर्म्मप्रभेदिका २ । इत्यमरः ॥
"उद्यम्यारामयकायोत्थितस्य" । इति माघः ।)

आराग्रं, क्ली, (आरायाः अग्रं षष्ठीतत् ।) अर्द्धचन्द्राद्यस्त्रमुखं ।
"अर्द्धचन्द्रखुरप्रादिधाराग्रं मुखमुच्यते" ।
"आराग्रन्तु मुखन्तेषां पुष्पपत्रादिभेदतः" ॥ इति हलायुधः ॥

आरात्, व्य, (आ राति । रा दाने बाहुलकादातिप्रत्ययः ।) दूरं । निकटः । इत्यमरः ॥ (यथा, उत्तरचरिते ।
"मेघमालेव यश्चायमारादपि विभाव्यते" । इति
"तमर्थमारादभिवर्त्तमानम्" । इति रघौ २।१० ।

आरातिः, पुं, ( आङ्+रा+क्तिन् । ) अरातिः । शत्रुः । इति भरतः द्विरूपकोषश्च ॥

आरात्रिकं, क्ली, (आङ्+रात्रि+कन् ।) नीराजननिमित्तदीपः । नीराजना । नीराजनपात्रञ्च । आरति इति भाषा । तथाच हरिभक्तिविलासे ।
"ततश्च मूलमन्त्रेण दत्त्वा पुष्पाञ्जलित्रयं ।
महानीराजनं कुर्य्यात् महावाद्यजयस्वनैः ॥
प्रज्वालयेत्तदर्थञ्च कर्पूरेण घृतेन वा ।
आरात्रिकं शुभे पात्रे विषमानेकवर्त्तिकं" ॥
अन्यच्च ।

"आदौ चतुष्पादतले च विष्णो-
र्द्वौ नाभिदेशे मुखमण्डलैकं ।
सर्व्वेषु चाङ्गेष्वपि सप्तवारा-
नारात्रिकं भक्तजनस्तु कुर्य्यात्" ॥

आराधनं, क्ली, ( आङ्+राध्+ल्युट् ।) साधनं । प्राप्तिः । तोषणं । इत्यमरः ॥ पचनं । इति मेदिनी ॥ (यथा वैराग्यशतके ह्यणादृषणे ५ ।
'मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः' । उत्तरचरिते । प्रथमाङ्के ।
"स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि ।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा" ॥
कुमारसम्भवे १ । ५९ ।

"आराधनायास्य सखीसमेतां
समादिदेश प्रयतां तनूजाम्" ।)

आराधना, स्त्री, (आङ्+राध्+णिच्+युच्+स्त्रीत्वात् टाप् ।) साधना । तत्पर्य्यायः । सेवा २ भक्तिः ३ परिचर्य्या ४ प्रसादना ५ शुश्रूषा ६ उपास्तिः ७ वरिवस्या ८ परिष्टिः ९ उपचारः १० । इति हेमचन्द्रः ॥

आरामः, पुं, (आरम्यतेऽत्र, आङ्+रम्+आधारे घञ् ।) उपवनं । इत्यमरः ॥ वागान् इति भाषा । (यथा, मनुः,—८ । २६२ । ८ । २६४ ।
"क्षेत्रकूपतड़ागानामारामस्य गृहस्य च" ।
"गृहं तड़ागमारामं क्षेत्रं वा भीषया हरन्" ॥)

आरामशीतला,स्त्री,(आरामत्वात् शीतला स्निग्धा ।) सुगन्धिपत्रिविशेषः । वर्व्वय्यादिवर्गे लिखिता । तत्पर्य्यायः । आनन्दी २ शीतला ३ सुगन्धिनी ४ रामा ५ महानन्दा ६ गन्धाढ्या ७ रामशीतला ८ । अस्या गुणाः । तिक्तत्वं । शीतलत्वं । पित्तहारित्वं । दाहशोषप्रशमनत्वं । विस्फोटव्रणरोपणत्वञ्च । इति राजनिर्घण्टः ॥ (यथा वैद्यके ।
"आरामशीतला तिक्ता शीतला पित्तहारिणी" ।)

आरालिकः, त्रि, (अरालं कुटिलं चरति इति ठक् ।) सूपकारः । पाचकः । इत्यमरः ॥

आरावः, पुं, (आङ्+रु+घञ् ।) शब्दः । इत्यमरः ॥ (यथा महाभारते ।
"आरावं मात्स्यवर्गस्य भृगूणां क्षत्रियैर्वधे" ।
"आरावः सुमहांश्चासीत्" । )

आरुः, पुं, (ऋ+उण् ।) वृक्षभेदः । कर्कटः । शूकरः । इति मेदिनी ॥

आरूः,पुं, (ऋच्छति अर्य्यते वा । ऋ+ऊ+णिच ।) पिङ्गलवर्णः । तद्युक्ते त्रि । इत्युणादिकोषः ॥

आरूकं, क्ली, (आरू+कन् ।) हिमालये प्रसिद्धौषधीविशेषः । आड़ इति भाषा । तत्पर्य्यायः । वीरसेनं २ वीरं ३ वीरारुकं ४ । तत्पत्रपुष्पादिभेदतः चतुर्जातिः । तेषां गुणाः । मधुरत्वं । हिमत्वं । अर्शःप्रमेहगुल्मादिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ (यथा चरके ॥
"अम्लं परूषकं द्राक्षा वदर्य्यारुकाणि च" ॥)

आरूढ़ः, त्रि, (आङ्+रुह्+कर्त्तरि क्तः ।) कृतारोहणः । वृक्षादिर उपर चड़ा व्यक्ति इति भाषा । यथा,—
"राम रामेति रामेति कूजन्तं मधुराक्षरं ।
आरूढ़कविताशाखं वन्दे वाल्मीकिकोकिलं" ।
इति रामायणपाठस्य पूर्व्वपाठ्यश्लोकः ॥
(यथा स्मृतिः ।
"आरूढ़ो नैष्ठिकं धर्म्मं यस्तु प्रच्यवते पुनः ।
प्रायश्चित्तं न पश्यामि येन शुध्येत् स आत्महा" ॥
गीता ।
"योगारूढ़स्य तस्यैव शमः कारणमुच्यते" ।)